श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीवेदान्तदेशिक यतीन्द्र महादेशिकैरनुगृहीता

# ॥ श्रीलक्ष्मीनृसिंहप्रपत्तिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीनृसिंहप्रपत्तिः ॥

यस्याभवद्भक्तजनार्तिहन्तुः पितृत्वमन्येष्वविचार्य तूर्णम्।
स्तम्भेऽवतारस्तमनन्यलभ्यं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ १ ॥

श्रीतापनीयेऽप्रतिमप्रभावम् श्रीतैत्तिरीयेकुचरोगिरीष्ठः।
इतीव पक्षीन्द्रधराधरस्त्वं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ २ ॥

संवर्ग विद्या विलसत्स्वरूपं स्तम्भैकडिम्भात्मलसत्प्रभावम्।
त्रैलोक्यसम्पूर्णनृसिंहमूर्तिं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ३ ॥

हिरण्यदातारमपीन्द्रहेतोः हिरण्यहन्तारमथाष्टबाहुम्।
शान्तं सताम् उग्रम् असत्समाजे लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ४ ॥

सन्तोषहासेन सदारमायां व्यान्ताननं स्वर्ण सटाभिरामम्।
जिह्वाधरन्यस्त रमेक्षणान्तं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ५ ॥

सञ्चारयोग्यां च पदावहन्तं श्रीपादुकां चेञ्चुसुतां रमां च।
सव्येन हस्तेन परिष्वजन्तं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ६ ॥

श्रीमद् द्वयार्थो ह्यहमेव सत्यम् इतीव सर्वान् प्रतिबोधयन्तम्।
रमानृसिंहन्त्वविभक्तरूपं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ७ ॥

श्रीवेङ्कटेशेन विवाहकाले सम्पूजितं सर्वविधोपचारैः।
श्रीशङ्खचक्राभयबाहुदीप्तं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ८ ॥

अहोबिलं सानुज एत्य रामः रमाहरेर्यस्य चकार पूजां।
पद्यैश्च पञ्चामृत भोग्यशब्दैः लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ९ ॥

समाश्रयार्थन्त्वपराधिवर्गे समागते तत्र निवृत्तवक्त्रम्।
श्रीवाक्यसन्तुष्ट कृपार्द्रनेत्रं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ १० ॥

सञ्चारयोग्यं प्रसमीक्ष्यकालं कालेकलौ यस्त्वरयाऽभ्यषिञ्चत्।
श्रीवासनामानमहो मुनीन्द्रं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ११ ॥

समाश्रितानामिह सेवनार्थम् अहोबिलेह्यद्यमठे ज्वलन्तम्।
सुवर्णडोलाविलसत्स्वरूपं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ १२ ॥

श्रीवण्शठारातियतीन्द्र पूर्वैः स्थानेऽभिषिक्तैर्यतिराजचन्द्रैः।
सम्पूजितं ह्यात्मदमात्मदानां लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ १३ ॥

अहोबिले गारुडशैलमध्ये कृपावशात् कल्पित सन्निधानम्।
लक्ष्म्या समालिङ्गितवामभागं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ १४ ॥

लक्ष्मीनृसिंहार्चन हृष्टचित्तः भक्त्यैव वेदान्तगुरुर्यतीन्द्रः।
लक्ष्मीनृसिंहस्य शुभां प्रपत्तिं चक्रे जनानां निखिलार्थसिद्ध्यै॥ १५ ॥

॥ इति श्रीलक्ष्मीनृसिंहप्रपत्तिः समाप्ता ॥